# श्रीशिवषडक्षर स्तोत्रम्

ॐकारं बिंदु संयुक्तं नित्यं ध्यायंति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमो नमः ॥ १॥

नमंति ऋषयो देवा नमन्त्यप्सरसां गणाः ।
नरा नमंति देवेशं नकाराय नमो नमः ॥ २॥

महादेवं महात्मानं महाध्यानं परायणम् ।
महापापहरं देवं मकाराय नमो नमः ॥ ३॥

शिवं शांतं जगन्नाथं लोकानुग्रह कारकम् ।
शिवमेकपदं नित्यं शिकाराय नमो नमः ॥ ४॥

वाहनं वृषभो यस्य वासुकिः कंठभूषणम् ।
वामे शक्तिधरं देवं वकाराय नमो नमः ॥ ५॥

यत्र यत्र स्थितो देवः सर्वव्यापी महेश्वरः ।
यो गुरुः सर्वदेवानां यकाराय नमो नमः ॥ ६॥

षडक्षरमिदं स्तोत्रं यः पठेच्छिव संनिधौ ।
शिवलोक मवाप्नोति शिवेन सह मोदते ॥ ७॥

॥ इति श्री शिव षडक्षर स्तोत्रम् सम्पूर्णम् ॥